१३। इत्यमरः।१।६।१॥ त्रयोदश वचने। पूर्व्वसप्तकं वागधिष्ठातायां देवतायाञ्च। इति तट्टीकायां भरतः॥ शास्त्रीयाष्टादशभाषा यथा। संस्कृतम् १ प्राकृता २ उदीची ३ महाराष्ट्री ४ मागधी ५ मिश्रार्द्धमागधी ६ शकाभीरी ७ अवन्ती ८ द्राविडी ९ ओड्रीया १० पाश्चात्या ११ प्राच्या १२ वाह्लीका १३ रन्तिका १४ दाक्षिणात्या १५ पैशाची १६ आवन्ती १७ शौरसेनी १८। एतासां लक्षणोदाहरणानि प्राकृतलङ्केश्वर-व्याकरणे द्रष्टव्यानि॥

अथ भाषाविभागः।

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्॥
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारि-
णाम्॥
चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शकाराणां शकादीनां शाकारीं संप्रयोजयेत्॥
वाह्लीकभाषा दिव्यानां द्राविडी द्रविडादिषु।
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु॥
आभीरी शावरी चापि काष्ठपत्त्रोपजीविषु।
तथैवाङ्गारकारादौ पैशाची स्यात् पिशाच-
वाक्।
चेटीनामप्यनीचानामपि स्यात् शौरसेनिका॥
बालानां षण्डकानाञ्च नीचग्रहविचारिणाम्।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं
क्वचित्॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपस्कृतस्य च।
भिक्षुवल्कधरादीनां प्राकृतं संप्रयोजयेत्॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च।
देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम्॥
यद्देशो नीचपात्रस्तु तद्देशं तस्य भाषितम्।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः॥
योषित्सखीबालवेश्याकितवाप्सरसां तथा।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतञ्चान्तरान्तरा॥
एषामुदाहरणान्याकारेषु बोद्धव्यानि। भाषा-लक्षणानि भाषार्णवे। इति साहित्यदर्पणे ६ परिच्छेदः॥

अथ भाषापादः।

तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती।
"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्म्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कथितः पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिर्व्यक्तं साध्यं साधना-र्हाभिमतं पक्षं विदुः। अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात्। अतएवोक्तम्।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
असङ्करेण वक्तव्ये व्यवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत्॥"
उत्तरो विजयी। यद्यप्यन्यत्र साध्यं तद्-विशिष्टधर्म्माधर्म्मौ पक्ष इति भेदः तथाप्यत्र वाक्प्रतार्य्यर्णादिधर्म्मविशेषविशिष्टतया धर्म्मि-णोऽधमर्णपदैरेव साध्यत्वात् साध्यपक्षयोरभेदा-भिधानम्। उपसंहारे च एवंविधः पक्ष इति। मिताक्षरायान्तु। भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थमुक्ता भाषास्वरूप-प्रपञ्चमाह। स्वल्पाक्षर इति। निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः। तत्र।
"द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥"
इति गृह्यसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत्॥ *॥ तच्छोधनमाह बृहस्पतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्त्रे निवेशयेत्"
फलकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके ततः पत्त्रेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत्॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनां वचः।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभावोक्तमकृत्रिमम्। एतच्च स्वरविशेषादिना सुज्ञेयम्। अतएव याज्ञवल्क्यः।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥"
भूतं तत्त्वार्थसम्बन्धम्। नारदः।
"भूतं तत्त्वार्थसम्बन्धं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्ष्या साध्वसाधु वा।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते॥"
सर्व्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसी-दति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थ-विवादग्रहणाच्चान्युक्ततविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थाद्धीयत इति गम्यते। यथाह-मनेन शिरसि पादेन ताडितः इत्यभिधाय केवलं हस्तेन ताडितः इति वदन् केवलं दण्ड्यः पराजीयते च। ततश्च त्वं मह्यम्यणं धारयसि मत्त ऋणत्वेन गृहीततावद्धनकत्वादिति भाषा-शरीरम्। एतच्च संस्कृतदेशभाषान्यतरेण यथा-बोधं वक्तव्यं लेख्यं वा। म्लेच्छानामपि वादिप्रति-वादितादर्शनात्। अतएवाध्यापनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः॥
इति व्यवहारतत्त्वम्॥

भाषापरिच्छेदः, पुं, विश्वनाथन्यायपञ्चाननकृत-न्यायपरिभाषाग्रन्थः। अस्य अयमाद्यश्लोकः।
"नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय॥"
तस्यायमन्त्यश्लोकः।
"सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते।
तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात्॥"
अस्य टीका सिद्धान्तमुक्तावली॥

भाषापादः, पुं, (भाषायाः पादः।) चतुष्पाद्व्य-वहारान्तर्गतप्रथमपादः। तस्य लक्षणं यथा,—
"अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च॥
वर्षर्त्तुमासपक्षाहोवेलादेशप्रदेशवत्।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम्॥
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च।
परात्मपूर्व्वजानेकराजनामभिरङ्कितम्॥
क्षमालिङ्गात्मपीडावत्कथिताहर्त्तृदायकम्।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते॥"
इति मिताक्षरायां व्यवहाराध्यायः॥
अस्य विवरणं भाषाशब्दे द्रष्टव्यम्॥

भाषितं, क्ली, (भाष्यते इति। भाष्+भावे क्तः।) वचनम्। इत्यमरः।१।६।१॥(यथा, मनौ।८।२६।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥"
भाष्यते स्मेति। भाष्+कर्म्मणि क्तः।) कथिते त्रि॥ (यथा, कामन्दकीये नीतिसारे।५।२४।
"प्रविश्य सानुरागस्य चित्तं चित्तज्ञसम्मतः।
समर्थयंश्च तत्पक्षं साधु भावित भाषितः॥")

भाष्यं, क्ली, (भाष्यते विवृततया वर्ण्यते इति। भाष+ण्यत्।) चूर्णिः। इति स्वामी॥ सूत्र-विवरणग्रन्थः। तस्य लक्षणम्।
"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"
इति लिङ्गादिसंग्रहटीकायां भरतः॥ सूत्रो-क्तार्थप्रपञ्चकम्। इति हेमचन्द्रः॥ (भाष्यते अनेनेति। ण्यत्।) गृहविशेषः। इति माध-वीति मथुरेशः॥ (भाष्+ण्यत्।) कथ-नीये त्रि॥

भाष्यकारः, पुं, (भाष्यं चूर्णिं करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) महा-भाष्यकर्त्ता मुनिः। तत्पर्य्यायः। गोनर्दीयः २ पतञ्जलिः ३ चूर्णिकृत् ४। इति त्रिकाण्डशेषः॥
"अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ।
नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः॥"
इति दुर्गसिंहः॥

भास ऋ ङ भासि। दीप्तौ। इति कविकल्प-द्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ